तत्पर्य्यायः। ककुभः २। इत्यमरः। १।३।७॥ सूत्ररचितभाण्डम्। धोकड़ा इति ख्यातः। तत्पर्य्यायः। स्यूनः २ स्योनः ३ धौतकटः ४ स्यतिः ५ स्यूतः ६। इति भरतः॥ (यथा, सुश्रुते। १। ८।
"हृतिवस्तिप्रसेवकप्रभृतिषूदकपङ्कपूर्णेषु भेद्य-योग्याम्॥") प्रकृष्टतन्तुसन्तानकर्त्ता च॥

प्रस्कण्वः, पुं, (प्रगतं कण्वं पापं यस्मादिति। "प्रस्कण्वहरिश्चन्द्राहणो।" ६।१।१५३। इति सुट्।) ऋषिविशेषः। स च वैदिकसन्ध्यान्तर्गतसूर्य्योपस्थानमन्त्रस्य ऋषिः। (यथा, ऋग्वेदे। १। ४४। ६।
"प्रस्कण्वस्य प्रतिरन्नायुर्जीवसे नमस्या दैव्यं जनम्॥")

प्रस्कन्दनं, क्ली, (प्र+स्कन्द+ल्युट्।) विरेकः। इति रत्नमाला॥ (यथा, महाभारते। १। ८४। २६।
"अग्निप्रस्कन्दनपरस्त्वञ्चाप्येवं भविष्यसि॥")

प्रस्कन्नः, त्रि, (प्रकर्षेण स्कन्नः।) पतिते, त्रि। इति हेमचन्द्रः॥

प्रस्तरः,पुं,प्रस्तृणाति आच्छादयति यः। (प्र+स्तृ+पचाद्यच्।)शिला। पातर इति भाषा। तत्पर्य्यायः। ग्रावा २ पाषाणः ३ उपलः ४ अश्मा ५ दृषत् ६ दृषत् ७ पारारुकः ८ पारटीटः ९ मृत्तमरः १० काचकः ११ शिला १२॥ पल्लवादिरचितशय्या। यथा,—
"पल्लवाद्यैर्विरचिते शयनीये तु संस्तरः।
प्रस्तरः प्रस्तिरश्चेति प्रस्तारोऽपि च कुत्रचित्॥"
इति शब्दरत्नावली॥
(यथा, मनुः। २। २०४।
"गोऽश्वोष्ट्रयानप्रासादप्रस्तरेषु कटेषु च।
आसीत गुरुणा सार्द्धं शिलाफलकनौषु च॥")
मणिः। इति मेदिनी। रे, १८१॥

प्रस्तरिणी,स्त्री,(प्रस्तरस्तदाकारोऽस्त्यस्या इति प्रस्तर+इनिः ङीप्।) गोलोमिका। इति राजनिर्घण्टः॥ (विषयोऽस्या गोलोमिकाशब्दे ज्ञेयः॥)

प्रस्तारः,पुं,(प्र+स्तृ+घञ्।) तृणवनम्। तत्पर्य्यायः। तृणाटवी २ ऋषः ३। इति हेमचन्द्रः। ४। १७७॥ पल्लवादिविरचितशयनीयम्। इति शब्दरत्नावली॥ शय्या। इति हारावली॥ छन्दःप्रभृतीनां प्रभेदज्ञापकसङ्केतविशेषः। यथा,—
"पादे सर्व्वगुरावाद्यात् लघु न्यस्य गुरोरधः।
यथोपरि तथा शेषं भूयः कुर्य्यादमुं विधिम्॥
ऊने दद्याद्गुरूनेव यावत् सर्व्वलघुर्भवेत्।
प्रस्तारोऽयं समाख्यातश्छन्दोविचितिवेदिभिः॥"
इति वृत्तरत्नावली॥ * ॥
अपि च। अहपत्थार। पढ़म गुरु हेट्ठ ठाणे लहुआ परिठवउ अप्पबुद्धो ए। सरिसा सरिसा पन्ती उव्वरिआ गुरुलहु देहु॥ अस्य टीका। एतच्छन्दोज्ञानं प्रस्तारज्ञानाधीनमिति प्रस्तारं दर्शयति। प्रथमं गुरोरधःस्थाने लघुकं स्थापय आत्मबुद्ध्या सदृशी सदृशी पंक्तिरुद्धृत्तौ गुरुलघू देहि सदृशी पंक्तिर्दक्षिणे कार्य्या वामे गुरुलघुभिः पूरणं कार्य्यं इदन्तु मात्राप्रस्तारविषयं तत्रापि गुरोर्लिखनयोग्यत्वे गुरुर्लेख्यः अपरत्र लघुर्देयः। वर्णप्रस्तारे तु गुरुणैव पूरणं कार्य्यं तत्रायं प्रकारः आदौ गुरुर्लेख्यः तत्र प्रथमं गुरोरधःस्थाने लघुर्लेख्यः तद्दक्षिणे चोपरिस्थितपंक्तेः सदृशी कार्य्या वामे च गुरुलघुभिः पूरणं कार्य्यं वामे चेक एकलघुः पतति वर्णप्रस्तारे तु वामे लघुस्पर्शो नास्ति यथा विकल्पप्रस्तारे। ६६। प्रथमगुरोरधो लघुर्वामतश्च कलार्द्धपूरणं गुरुणैव कार्य्यं दक्षिणे च पंक्त्यभावः ततो गुरोरधो लघुर्लेख्यः दक्षिणे च लघोरधो लघुर्लेख्यः वामे च कलापूरणं एकेन लघुना कार्य्यं एवं चतुष्कला-६६दावपि बोध्यं यथा अक्षरच्छन्दसि६६एवमन्यत्रापि बोध्यम्॥ अथ सकलप्रस्तारसंख्या। दव्वीसा सत्तसआतइं सत्तावह सहज्जाइं वाआलिसह लक्खं तेरहकोड़ी समग्गाइं। अस्य टीका। अत्र चैकाक्षरमारभ्य षड्विंशत्यवधिवर्णवृत्तानां प्रस्तारे कियती संख्येत्यत आह। १३४,२१७,७२६,षड्विंशतिः सप्तशतानि तथा सप्तदशसहस्राणि द्विचत्वारिंशल्लक्षास्त्रयोदशकोट्यः समग्राणि अङ्कस्य वामा गतिरित्यङ्काः स्थाप्याः। इति पिङ्गलः शीघ्रबोधभूषणञ्च॥

प्रस्तार्य्यर्म्म, [न्] क्ली, नेत्ररोगभेदः। तस्य लक्षणम्।
"प्रस्तार्य्यर्म्म तनुस्तीर्णं श्यावं रक्तनिभं सिते॥"
इति माधवकरः॥
अपि च।
"समस्तादिस्तृतः श्यावो रक्तो वा मांससञ्चयः
सन्निपातेन दोषाणां प्रस्तार्य्यर्म्म तदुच्यते॥"
इति रक्षितधृतनिमिः॥
तस्यौषधम्।
"कतकस्य फलं शङ्खं त्र्यूषणं सैन्धवान्वितम्।
फेनो रसाञ्जनं क्षौद्रं विड़ङ्गानि मनःशिला॥
कुक्कुटाण्डकपालानि वर्त्तिरेषा व्यपोहति।
तिमिरं पटलं काचमर्म्मशुक्रं तथैव च॥
कण्डूक्लेदार्बुदं हन्ति मलमाशु सुखावती॥"
इदि चक्रपाणिदत्तः॥

प्रस्तावः, पुं,(प्र+स्तु+"प्रे द्रुस्तुस्रुवः।" ३।३। २७। इति घञ्।) अवसरः इत्यमरः। ३। २। २४॥ प्रसङ्गस्तुतिः॥ इति भरतः॥ प्रसङ्गः इति भानुदीक्षितः॥ (यथा, मृच्छकटिके। ९अङ्के! "प्रस्तावेनाधिकरणिकस्त्वांद्रष्टुमिच्छतीति॥") प्रकरणम्। यथा,—
"प्रस्तावदेशकालादेर्वैशिष्टात्प्रतिभाजुषाम्॥"
इत्यस्यार्थे काव्यप्रकाशः॥

प्रस्तावना,स्त्री,(प्रस्तावयति विज्ञापयति कार्य्यादिकमिति। प्र+स्तु+णिच्+युच्। टाप्।) आरम्भः। इति जटाधरः॥ सूत्रधारेण सह नटीविदूषकादीनां परस्परविचित्रभाषणम्। तस्या लक्षणम्। यथा,—
"नटी विदूषको वापि पारिपार्श्विक एव वा।
सूत्रधारेण सहिताः संलापं यत्र कुर्व्वते॥
चित्रैर्वाक्यैः स्वकार्य्योत्थैः प्रस्तुताक्षेपिभिर्म्मिथः॥
आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनापि सा॥"
इति साहित्यदर्पणम्॥

प्रस्तिरः, पुं, (प्रस्तरः। निपातनात् इत्वम्।) पल्लवादिरचितशय्या। इति शब्दरत्नावली॥

प्रस्तीतः, } प्रस्तीमः, } त्रि, (प्र+स्त्यै+क्तः। "प्रस्त्योऽन्यतरस्याम्।" ८। २। ५४। इति निष्ठातस्य मो वा।) संहतः। ध्वनितः। प्रपूर्व्वस्त्यैधातोः कर्म्मणि क्तप्रत्ययः। इति मुग्धबोधव्याकरणम्॥

प्रस्तुतः, त्रि, प्रस्तूयते स्मेति। प्र+स्तु+क्तः।) प्रकरणप्राप्तः। यथा,—
"अप्रस्तुतप्रशंसा सा या चैव प्रस्तुताश्रया॥"
इति काव्यप्रकाशः॥
प्राकरणिकः। प्रासङ्गिकः। इत्यलङ्कारकौस्तुभः॥ निष्पन्नः। यथा। प्रस्तुतवृत्तेर्मयट्। अन्नं प्रस्तुतं अन्नमयम्। यवागूः प्रस्तुता यवागूमयी। इति कलापतद्धितः॥ प्रकर्षस्तुतियुक्तः। प्रपूर्व्वस्तुधातोः कर्म्मणि क्तः। उपस्थितः। प्रतिपन्नः। उद्युक्तः। इति लोकव्यवहारदर्शनात्॥

प्रस्तृतः, त्रि, (प्र+स्तृ+क्तः।) अन्तरितः। इति त्रिकाण्डशेषः॥

प्रस्थः, पुं, (प्रकर्षेण तिष्ठतीति। प्र+स्था+ "आतश्चोपसर्गे।" ३। १। १३६। इति कः। यद्वा, प्रतिष्ठतेऽस्मिन्ननेन वेति घञर्थे कः।) परिमाणविशेषः। स तु चतुःकुडवरूपः। इत्यमरभरतौ॥ आढ़कचतुर्थांशः। इति लीलावती॥ द्विशरावपरिमाणम्। इति वैद्यकपरिभाषा॥ (यथा, सुश्रुते शारीरस्थाने। ८। अध्याये।
"बलिनो बहुदोषस्य वयस्थस्य शरीरिणः।
परं प्रमाणमिच्छन्ति प्रस्थं शोणितमोक्षणे॥")

प्रस्थः, पु, क्ली, (प्र+स्था+कः।) अद्रेः समभूभागः। अद्रेरेकदेशः। इति भरतः॥ तत्पर्य्यायः। स्नुः २ सानुः ३। इत्यमरः। २। ३। ५॥ (यथा, कुमारे। १। ५४।
"प्रस्थं हिमाद्रेर्मृगनाभिगन्धि
किञ्चित् क्वणत्किन्नरमध्युवास॥")
उन्मितवस्तु। इति मेदिनी॥ विस्तारः। यथा,
"दीर्घे प्रस्थे समानञ्च न कुर्य्यान्मन्दिरं बुधः॥"
इति ब्रह्मवैवर्त्ते जन्मखण्डे १०३ अध्यायः॥
प्रकृष्टस्थितिविशिष्टे, त्रि॥

प्रस्थपुष्पः, पुं, (प्रस्थमितं पुष्पमस्य।) मरुवकः। इत्यमरः। २। ४। ७९॥ (तत्पर्य्यायो यथा,— भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।
"मारुतोऽसौ मरुवको मरुन्मरुरपि स्मृतः।
फणी फणिज्झकश्चापि प्रस्थपुष्पः समीरणः॥")